Research Paper
E-ISSN NO : 2455-295X | VOLUME : 7 | ISSUE : 11 | NOVEMBER 2021

# संविदा-शिक्षकाणां स्थितिः

**अभिषेक जैन [1]**

[1] अनुसन्धाता, केन्द्रीयसंस्कृविश्वविद्यालयः, भोपालपरिसरः, भोपालम् (म.प्र.)

**ABSTRACT:**

**KEYWORDS:**

शिक्षायाः प्रमुखमुद्देश्यं व्यक्तेः बालकस्य वा सर्वाङ्गीणविकासः। शिक्षते यया सा शिक्षेति। अनया व्युत्पत्त्या शिक्षा शब्दः साधनत्वेन प्रयुक्तः। वस्तुतः साधनं तत् भवति येन क्रियासिद्धौ सहायता प्राप्यते। प्रस्तुताध्ययनस्य मुख्यं कार्यम् अद्यतनीयसमाजे विविधक्षेत्रेषु प्रतिपदं परिस्थितिजन्यं काठिन्यमनुभूयमानमस्ति। तेषां काठिन्यानां तासां समस्यानाञ्च अपाकरणाय दिनं दिनम् अनुसन्धानाय प्रवर्तन्ते अनुसन्धातारः। विदितचरमिदं समेषां सुधीनां शिक्षाविदाञ्च यत् शिक्षा ह्येका गतिशीला प्रक्रिया वर्तते। या बालकस्य सर्वाङ्गीणविकासार्थमेव प्रवर्तते।

सम्प्रति शिक्षाक्षेत्रे वञ्चनस्य व्यापारः प्रसारितो वर्तते। प्रत्येकनिर्मित्यनुमोदनस्यानुचितवित्तं सुनिश्चयी क्रियते। विकासेन साकं भ्रष्टाचारः स्वाभाविकतया पतति। सन्दर्भेऽस्मिन् भ्रष्टाचारावश्यकदोषरूपेण स्वीकृतेः सहजप्रवृत्तिः दरीदृश्यते। क्रयविक्रयव्यापारेऽस्मिन् शिक्षकः स्वात्मानमपि व्ययीकर्त्तुं विवशतया प्रवर्तते। यद्येकोऽध्यापकः शिशुशिक्षास्तरं सुदृढीकर्त्तुं मिच्छति तदा तु पाठ्यक्रमाध्यापनस्थितौ न्यूनतागच्छति। एतावत्वैपरीत्ययुक्तावस्थायां कठिनपरिस्थित्यां दण्डसहायेन-प्रचल्यमानक्रीडायारज्जूपरि साम्यता-साधकाध्यापकेभ्यो प्रणमाञ्जलिसर्मपणाय मनः इच्छति।

यदि मुख्यशिक्षकाणां दशदिशयोस्सिथतिः एवमस्ति तदा तु केषुचित्प्रान्तेषु नियमितकालायांशिकतया लब्धवृत्तिशिक्षकाणां स्थितिः का भविष्यतीति नास्त्यनुमानगम्यः। मध्यप्रदेशप्रान्तैतस्याः प्रणाल्याः अनुसरणेनशि-क्षकास्संविदा-शिक्षकनामधेयेनावज्ञायन्ते।अस्मात्कारणात् संविदाशब्दो विचारार्होऽस्ति।

भारतीयसंविदाधिनियमः 1872 (Indian contract act 1872) भारतस्य प्रमुखविधिरस्ति। अधिनियमोऽयम्भारते ब्रिटिश्शाशनकालदारब्धोऽभूत्। अयन्तु (इंग्लिश कॉमन लॉ) इत्यस्मिन्नाश्रतौ स्तः। भारतीयानुबन्धाधिनियमो द्विसप्तत्यधिकाष्टादशशततमे वर्षे वैशाखमासस्य पञ्चविंशतिदिनाङ्के पारितोऽभूत्। एवञ्च द्विसप्तत्यधिकाष्टादशशततमे वर्षे आश्विनमासस्य एकदिनाङ्कतः समारब्धः।

अयमधिनियमः संविदानां निर्माणाय, निष्पादनाय, प्रवर्तनीयसामान्यसम्बद्धसिद्धान्तानां, संविदासम्बद्धानां च नीतिनिर्धारयति। यद्यपि प्रतिक्रियाधिनियमः, वस्तुविक्रयाधिनियमः, पराक्रम्याङ्किताधिनियमः, व्यापाराधिनियमश्च तकनीकदृष्ट्या संविदाविधिविभागास्सन्ति। तथाप्येतेषां समायोजनं पृथगधिनियमेषु विहितो वर्तते।

भारतीयसंविदाधिनियमः 1872 इति वर्षानुसारेण संविदाविधिमाध्यमेन प्रवर्त्तनीय ।:प्रवर्तनीयविधिना प्रवर्तनशक्त्या नियमाः संविदाः नैवाभिधीयन्ते। अभिप्रायमस्ति यत् समेषां प्रतिफलं मनसि निधाय प्रदीयमानाश्वासनम्, आश्वासनं तदैव प्रदीयते तदा कोऽपि प्रस्तावः स्वीक्रियते। स्वीकृतप्रस्तावैकः इत्यस्य निहितार्थः, अपरशब्देषु कार्यक्रमः तथा चास्य स्वीकृतिः निहिता भवति। कार्यक्रमः सम्पादनप्रक्रियारभ्यः पक्षैकद्वारा किञ्चिद्व्ययेन सेवाप्रदानप्रस्तुतिना विधीयते। विधिबाध्यतैव स्वेच्छया सहमत्याभावे संविदायाः न्यायिकं प्रवर्तनं प्रभावितं भविष्यति।

संविदापरिभाषैवमस्ति यत्निर्णयैको वर्त -ते, यस्मिन् एकपक्षः परिणामाय किञ्चित्कर्त्तुं प्रस्तुतिङ्करोति। एवञ्चान्यपक्षः तं स्वीकरोति। वाणिज्योद्योगयोः क्रयविक्रयौ संविदाष्वेवाश्रियेते। भारते भारतीयसंविदाधिनियमः 1872, संविदानां शासकीयविधिरस्ति, यस्मिन् संविदानां निर्माण- निष्पादन-प्रवर्तनीयता-सम्बद्धसिद्धान्ताः, विशेषसंविदाषु यथा क्षतिपूर्तिः इत्यादयः निर्धार्यन्ते। कमपि सन्धिपत्रं तदैव संविदारूपेणावमन्यते। यद्ययं विविधसम्मततया परिणामाय विधि-प्रयुक्तोद्देश्याय संविदां कर्त्तुं समर्थपक्षनिर्देशनेनैव भवेत्। स्पष्टतया निरस्तो न स्यात्। संविदा निश्चितरूपेण भवितव्या। तथा चास्याः प्रयोजनं विधिसम्बन्धस्थापनम्भवेत्। संविदारतपक्षेत्वमुं सम्पादयितुं विधिक्षमता भवेत्। संविदाधिनियमानुसारेण संविदायै सैव जनस्समर्थो विद्यते, यो विधितया वयस्कोऽस्ति, यस्य मानसिकस्थितिः सम्यगस्ति तथा च यः केनापि विधिना संविदायै योग्यताहीनरूपेण घोषितो वर्तते। इत्यादिवदवयस्केभ्यः, मानसिकविक्षिप्तेभ्यः विधिद्वारा संविदार्हरूपेणमानितेभ्यः संविदायां नियुक्तिप्रदानं नास्ति।

संविदाधिनियमस्य प्रमुखप्रावधानानि-

1. संविदाकरणार्थं न्यूनातिन्यूनतया पक्षद्वयमपेक्ष्येते। पक्षैकस्य प्रस्तुतिः महदावश्यकी वर्तते। अपरपक्षः स्वीकृतिः कुर्यात्। यज्जनः प्रस्तावं प्रस्तुतिं वा प्रकरोति सः प्रतिज्ञाकर्ता प्रस्तुति सम्पादकश्च-कथ्यते। यदा केनापि व्यक्तिना प्रस्तुतिः सम्पाद्यते, तदा प्राप्तप्रस्तुति इति संज्ञया (ऑफरी) ज्ञायते। तथा च यः प्रस्तुतिं स्वीकरोति 'सस्स्वीकर्ता' इत्यवबुध्यते। प्रस्तुत्येका भवेत्। प्रस्तुतिस्वीकरणमपि भवितव्यम्, यत् नियुक्तिसन्धिपत्रस्य परिणामः।प्रस्तुतिस्वीकरणं विधिप्रयुक्तं भवितव्यम्।

2. पक्षकाराशयो विधिबाध्यतायाः सर्जनं भवेत्। परवर्तितनियुक्तिसन्धिपत्रपक्षयोः मध्ये विधिसम्बन्धस्य परिचर्चा भवेत्।

3. संविदा मूलतः पक्षद्वयमध्ये व्यापारैको वर्तते, यस्मिन् प्रत्येकपक्षः किञ्चिदेवम्प्राप्नोति। यः तस्य कृते मूल्ययुक्तो लाभप्रदश्च भवति। तत्प्राप्तांशो विधौ 'प्रतिफलम्' इति संज्ञया ज्ञायते। प्रतिफलं कस्यापि वैधसंविदायाः मुख्यघटक वर्तते, यस्य कृते इदमेव तन्मूल्यम्। प्रतिफलेन विना संविदा-मान्या भवति। प्रतिफलमिदं वित्तरूपेण प्रदत्तसेवानां क्रियते। यतोहि प्रतिफलं भूतपूर्वभाविकभवितुं शक्यते। परन्त्विदं विधिप्रयुक्तम्भवनीयम्।

4. अर्थेऽस्मिन् संविदासंयुक्ताः पक्षकाराः विधितया शक्ताः भवेयुः तथा च लब्धवयस्काः स्युः। तन्मानसिक स्थिति स्समय्गभवेत्। ते संविदायै स्पष्टतया घोषितयोग्याः न स्युः। अशक्तपक्षकारकृतनियुक्ति- सन्धिपत्रं विधिरमान्यो वर्तिष्यते।

5. संविदा-पक्षाः स्वसम्मती स्वेच्छया दद्युः।सम्मतेरर्थो यद्पक्षकारः नियुक्ति सन्धिपत्रविषयकार्थे सन्तुष्टोऽस्ति। सम्मतिः तदैव मंस्यते यदि नियन्त्रण-अनुप्रयुक्तप्रभाव- कपटम् अनुचितवक्तव्यं-त्रुट्यादिभिः विना प्रदीयते, स्वेच्छया सम्मतौ सति संविदाविधिव्यवस्था प्रभाविता भविष्यति।

6. प्रस्तावस्य उद्देश्यम् अवश्यं विधिसम्मतं भूयात् प्रस्तावः अन्यायसंगतं भविष्यति चेत् सः- क) अवैधः अस्ति। ख) अनैतिकः, ग) व्यभिचारः, घ) एतस्य स्वरुपस्य अस्ति यत् अनुमतिः दद्यात् तु न्यायिकप्रावधानानामुल्लंघनं भविष्यतिः ङ) अन्यः व्यक्तिः सम्पत्तिं क्षयति। च) सार्वजनिक नीतेः विरुद्धोऽस्ति।

7. संविदा अधिनियमेन अथवा कश्तिदन्येन न्यायेन वा स्पष्टरुपेण घोषितप्रस्तावः प्रवर्तनीयः नैव भवति। एतेन संविदा अमान्यः भवति। संविदा अधिनियमः कितिचनप्रकाराणां प्रस्तावान् अमान्यः घोषयति। यथा विवाहे व्यवधानं, व्यापारः, न्यायिकः वा निर्णयानां यथा किञ्चिद् प्रस्तावः निबद्धः सम्बन्धित स्थितिः अन्तर्भवन्ति।

8. संविदायाः अस्पष्टनिबद्धः, अनिश्चितः वा न भवितव्यः चेत् कोऽपि प्रस्तावः अस्पष्टः अस्ति तु एतस्यार्थः अनिश्चितं कर्तुं शक्यते। सहैव एतं प्रस्तावितमपि न कर्तुं शक्यते। संविदायाः निबद्धाः एवं भवितव्यं येः कार्यान्विताः भवितुं शक्यन्ते। असम्भवकार्यकरणस्य प्रस्तावः अमान्यः भविष्यति, न्यायेन च अप्रवर्तनीयं भविष्यति।

## REFERENCES

1. गोस्वामी शिक्षादर्शन एवं उभरता भारतीय - डॉ बुद्धिप्रकाश, वाराणसी ,स्वाति पब्लिकेशन्स -समाज

2. Advanced Research Methodology, N.C.E.R.T.

3. A survey of Research in Education- M.B. Buch- C.A.S.E.M.S Uni of Baroda- 1972

4. Encyclopedia of Education- B.Winn Ralpa- Philosophical Library- 1959

5. Encyclopedia of Educational Research- C.W. (Ed.) Harris- Memillan company, New York- 1960

6. Encyclopedia of Education- Pul Monroe –Shree Publishers, New Delhi- 2000

7. Web

8. Trommsdorff, G. (1983). Future Orientation and Socialization. *International Journal of Psychology*, *18*(1–4), 381–406. https://doi.org/10.1080/00207598308247489

9. Wong, T. K. Y., Parent, A. M., & Konishi, C. (2019). Feeling connected: The roles of student-teacher relationships and sense of school belonging on future orientation. *International Journal of Educational Research*, *94*(December 2018), 150–157. https://doi.org/10.1016/j.ijer.2019.01.008